श्रीश्रीराधाकृष्णयोः कुञ्जाद्वेश्मागमनम्

स्रस्तं स्रस्तमुदञ्चयन्त्यधिशिरः श्यामं निचोलाञ्चलं
हस्तेन श्लथदुर्बलेन लुलिताकल्प्यं वहन्ती तनुम्।
मुक्तार्धामवरुध्य वेणिमलसस्पन्दे क्षिपन्ती दृशौ
कुञ्जात्पश्य गृहं प्रविश्य निभृतं शेते सखी राधिका ॥१॥

म्लानामुत्क्षिप्य मालां त्रुटितमणिसरः कज्जलं बिभ्रदोष्ठे
सङ्कीर्णाङ्गो नखाङ्कैर्दिशि दिशि विकिरन्घूर्णिते नेत्रपद्मे।
पश्य म्लानाङ्गयष्टिः स्फुटमपरिचितो गोपगोष्ठीभिरग्रे
गोष्ठं गोष्ठेन्द्रसूनुः प्रविशति रजनौ ध्वंअसमासादयन्त्याम्॥२॥

इति श्रीरूपगोस्वामिकृतस्तवमालायां श्रीश्रीराधाकृष्णयोः कुञ्जाद्वेश्मागमनं समाप्तम्